National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2019; 1(23): 57-58
© 2019 NJHSR
www.sanskritarticle.com

**अमित कुमार**
शोधछात्र,साहित्यविभाग,
श्रीलालबहादुरशास्त्री राष्ट्रिय संस्कृत-विद्यापीठम्,नवदेहली-110016

**Correspondence:**
**अमित कुमार**
शोधछात्र,साहित्यविभाग,
श्रीलालबहादुरशास्त्री राष्ट्रिय संस्कृत-विद्यापीठम्,नवदेहली-110016

# शिशुपालवधमहाकाव्ये वक्रोक्तिविचारः

**अमित कुमार**

भारतीयकाव्यशास्त्रे षड्सम्प्रदायाः प्रसिद्धः सन्ति। तेषु षड्सम्प्रदायेषु वक्रोक्तिसम्प्रदायः विशिष्टं स्थानं बिभर्ति। अस्य सम्प्रदायंस्य प्रवर्त्तकः कुन्तकाचार्यः स्वयं कुन्तकः अपि स्वकीये 'वक्रोक्तिजिविते' ग्रन्थे पुनः पुनः शिशुपालवधमहाकाव्यस्योदाहरणानि ददाति। इत्थं शिशुपालवधमहाकाव्ये आचार्यकुन्तकवक्रोक्तिसिद्धान्तस्य प्रत्येकभेदाः सम्प्राप्यन्ते। समीक्षणपूर्व वक्रोक्तेः सामान्यपरिचयः प्रस्तूयते। का नाम वक्रोक्तिः? वक्रोक्तेः सामान्यार्थः – वक्रा उक्तिः इति वक्रोक्तिः। परन्तुः अत्र वक्रोक्तिशब्दस्यार्थः व्यापको अस्ति। कविचातुर्यपूर्णकथनं वक्रोक्तिः। वक्रोक्तिसम्प्रदायस्य प्रमुखः आचार्यः कुन्तकः। कुन्तकाचार्यात् पूर्वमपि वक्रोक्तेः सामान्यः परिचयः प्राप्यते। कालिदासस्य 'वक्रः पन्थाः' प्रयोगेऽस्मिन वक्रस्यार्थः कुटिलो यथा –

**'वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशम्'**। (मेघ,प. 29)

काव्यशास्त्रीयग्रन्थे भामहेन वक्रोक्तेः कल्पना सर्वप्रथमं कृता।

**'सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते।**
**यात्नोऽस्यां कविना कार्यः कोऽजलंकारोऽनया॥** (काव्यालंकार 2.85)

बाणभट्टेन कादम्बरीगद्यकाव्ये वक्रोक्तेः प्रयोगों वाक्छलक्रीडालापपरिहासजल्पितचमत्कार-पूर्ण शैलीवचनप्रभृतिविदग्धतार्थेषु अकारि –

**'एषाऽपि बुध्यते एतावतीवक्रोक्तिः'** (कादम्बरी, 296)

कुन्तकात् पूर्वमपि वक्रोक्तेः सर्वालंकारमूलत्वं निरुपितमेव। एवं पूर्ववर्तिनां वक्रोक्तिर्निरुपणानां सारांशं स्विकृत्सैव कुन्तकाचार्येण विस्तृतरूपेण वक्रोक्तिनिरूपणं कृतम्। कुन्तकात् परवर्तिनः प्रमुखाचार्याः मम्मट-विश्वनाथप्रभृतयः वक्रोक्तिं केवलांलकारत्वेनैवश्वीकृतवन्तः परञ्च आचार्यकुन्तको वक्रोक्तेः सूक्ष्मादपि सूक्ष्मरूपं वर्णयति। वक्रोक्तेर्लक्षणम् –

**"उभावेतावलङ्कार्यो तयोः पुनरलङ्कृति।**
**वक्रोक्तिरेव वैदूग्घ्यभङ्भिणितिरुच्यते॥"**(व.जी. 1.10)

कथ्यते।

कुन्तकाचार्येण वक्रोक्तिसम्मतमेव काव्यलक्षणं समुपस्थापितम् –

**"शब्दाथौ सहितौ वक्रकविव्यापारशालिनि।**
**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि॥"**(व.जी. 1.107)

सर्वप्रथमं वक्राक्तिशब्दस्य प्रयोगोऽथर्ववेदे 'कुटिलाथे' कृतः। तद्यथा – अयं यो विपरूर्व्यग्रे मुखानि वक्र वृजिना कृणोषि। राघवपाण्डवीयकारः 'कविराज' आत्मनं सुबन्धुं बाण च वक्रोक्तिमार्गे निपुणन्नघोषयत्। यथा –

**"सुबन्धुबाणभट्टश्च कविराज इति त्रयः।**
**वक्रोक्तिमार्गनिपुणाचतुर्थो विद्यते न वा॥"** (रा.पा.पृ.20)

कुन्तकाचार्येण वक्रोकितेः षड्भेदाः निरूपिताः ते च सन्ति – वर्णविन्यासवक्रता – पदपूर्वार्द्धवक्रता – वाक्यवक्रता – प्रकरणवक्रता – प्रबन्धवक्रताश्चेति। तद्यथा –

**वर्णविन्यासवक्रत्वं पदपूर्वार्धवक्रता।**
**वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयाः॥**
**वाक्यस्य वक्रभावोन्यो भिद्यते यः सहस्त्रधा।**
**यत्रालंकारवर्गोसौ सर्वोऽप्यन्तर्भविष्यति॥**
**वक्रभावः प्रकरणे प्रबन्धे वाऽस्ति यादृशः।**
**उच्यते सहजाहार्य-सौकुमार्य-मनोहरः॥** (व.जी.1.19-21)

इत्थं वक्रोक्तिसिद्धान्तस्य काव्यशास्त्रीयसिद्धान्तेषु विशिष्टं स्थानं वर्तते। संस्कृतमहाकाव्येषु माघकृतं शिशुपालबधं विशिष्टमस्ति। महाकाव्येऽस्मिन् पदे-पदे वक्रता दरीदृश्यते। अत्र वक्रोक्तेः तेषां पुर्वोक्तानां भेदानां सक्रमेण विवेचनं क्रियते।

**वर्णविन्यासवक्रतायाः प्रभेदाः -**

**एको द्वौ बहवो वर्णा बध्यमानाः पुनः पुनः।**
**स्वल्पान्तरस्त्रिया सोक्ता वर्णविन्यासवक्रता॥**(व.जी.2.1)
**वर्नान्तयोगिनः स्पर्शा द्विरुक्तास्त-ल-नायदः।**
**शिष्टाश्च रादिसंयुक्ताः प्रस्तुतौचित्यशोभिनः॥**(व.जी.2.2)

अत्र एकवर्णस्य पुनरावृतिः, द्वयोर्वर्णयोः पुनरावृतिः, बहुवर्णानां पुनरावृतिः, स्वाल्पान्तरे मिलति। अपि च वर्णान्तियोगिनः स्पर्शवर्णस्य, द्विरुक्तास्त-ल-नायदः वर्णवक्रता, रादिसंयुक्तवर्ण – विन्यासवक्रतेति। एतेषां सर्वेषां भेदानामन्तर्भावः वर्णविन्यासवक्रताऽन्तर्गतेऽऽगच्छति।
वक्रोक्तिसिद्धान्तस्य प्रथमभेदस्य वर्णविन्यासवक्रोक्तेः शिशुपालवधे बहुन्युदाहरणानि दृष्टिगोचराणि भवन्ति। यथा–

**नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपंकजम्।**
**मृदुलतान्तलतान्तमलोक्यत्स सुरभिं सुरभिं सुमनोभरैः॥**
(शिशु.व.6.2)

श्लोकेस्मिन् बहुवर्णानां पुनरुक्तिः दरीदृश्यते। अतः वर्णविन्यासवक्रतान्तर्गते बहुवर्णयुक्तविन्यासवक्रता वर्तते।

**अमानवं जातमजं कुलो मनोः प्रभविनं भाविनमन्नमात्मनः।**
**मुमोच जानन्नपि जानकीं यः सदाभिमानैकधना हि मानवः॥**
(शिशु.व.1.67)

श्लोकेऽस्मिन् बहुवर्णानां पुनरुक्तिः दरीदृश्यते। अतः वर्णविन्यासवक्रतान्तर्गते बहुवर्णयुक्तविन्यासवक्रता वर्तते।

**पदपुर्वार्द्धवक्रता**

वक्रोक्तेः द्वितियभेदः पदपरार्द्धवक्रताऽस्ति। पदपरार्द्धवक्रताया अपरनाम प्रत्ययवक्रताऽस्ति वर्तते। प्रत्ययवक्रतायाः बहवः भेदाः सन्ति। ते च कालवैचत्र्यवक्रता-संख्यवक्रता-कारकवक्रता-पुरुषवक्रता-उपग्रहवक्रता- प्रत्ययवक्रता-उपसर्गवक्रता-निपातवक्रतेति। यथा –

**कालसमग्रेण ग्रहानमुचंता मनस्विनीरुत्कयितु पटियसा।**
**विलासिनस्तस्य वितन्वता रतीन न नर्मसाचिव्यमकारि नेन्दुना॥**
(शिशु.व.1.59)

श्लोकेऽस्मिन् 'गृहं' शब्दस्थाने 'गृहान्' शब्दस्य प्रयोग संख्यावक्रताअऽन्तर्गतेऽवऽगच्छति अर्थात् एकवचनस्थाने बहुवचनस्य प्रयोगः दरीदृश्यते।

**वाक्यवक्रता –**

वक्रिक्तिः चतुर्थभेदः वाक्यवक्रताया वर्तते। वाक्यवक्रताया अपरनाम वस्तुवक्रताऽस्ति। तृतीयोन्मेषे कुन्तकाचार्येण वक्रोक्तिजीवितग्रन्थस्य वाक्यवक्रतायाः भेदानां व्याख्या कृताऽस्ति।वाक्यवक्रताऽन्तर्गतेऽलंकाराणां समावेशोऽस्ति। यथा –

**जाज्वल्यमाना जगतः शान्तये समुपे युषी।**
**व्यद्यौतिष्ठ सभावेद्यामसौ नरशिखित्रयी॥** (शिशु.व.2.3)

अत्र 'नरशिखित्रयी' पदे रुपकालंकारः वर्तते। अतः रूपकालंकारः वाक्यवक्रताऽन्तर्गतेआगच्छति।

**प्रकरणवक्रता –**

वक्रोक्तेः पंचमो भेदः प्रकरणवक्रता वर्तते। सम्पूर्णग्रन्थस्यान्तर्गतमेकविशिष्टवाक्यसमूहाश्रित वर्ण्यविषयः प्रकरणवक्रता वर्तते। प्रकरणवक्रतायाः शिशुपालवधे नैकानि उदाहरणानि सम्प्राप्यान्ते। अत्र केवल प्रमुखोदाहरणान्येव प्रस्तौमि।

**यथा –**

**नवानधोअधो बृहतः पयोधरान् समूढकर्पूरपरागपाण्डुरम्।**
**क्षणं क्षणोत्क्षितगतेन्द्रकृतिना स्पुटोपमं भूतिसितेन शम्भुना॥**
(शिशु.व.1.14)

अत्र शिशुपालवधमहाव्याख्यातवृत्ते कल्पितकथांशस्य सन्निवेशः एव उत्पाद्यलावण्यवक्रतायाः उदाहरणमस्ति। अतः प्रकरणवक्रताऽन्तर्गते उत्पाद्यलावण्यवक्रताऽऽगच्छति।

**प्रबन्धवक्रता –**

वक्रोक्तेः षष्ठः भेदः प्रबन्धवक्रताऽस्ति। प्रबन्धस्य अर्थ अस्ति समस्तग्रन्थः। प्रबन्धवक्रतायाः षड्भेदाः ते च सन्ति-मूलरसपरिवर्तनवक्रता-समापनवक्रता-कथासाम्यवक्रता इति। शिशुपालबधे प्रबन्धवक्रतायाः बहून्युदाहरणानि सन्ति।

**यथा –**

**करोति कंसादिमहीभूतां वधाद् जनो मृगाणामिव तवस्तवम्।**
**हरे! हिरण्याक्षपुरः रसासुरद्विपद्वीषः प्रत्युत सा तिरस्क्रिया॥**
(शिशु.व.1.39)

श्लोकेऽस्मिन् वीररसः दुष्टिगोचरं भवति। यतोहि महाभारतमहाकाव्यस्य अगीरस शान्तं मन्यते। शिशुपालवधमहाकाव्यश्योपजिव्यं महाभारतेतिहासप्रसिद्धमहाकाव्यमस्ति।

**उपसंहार –**

शिशुपालवधमहाकाव्यं संस्कृतसाहित्यस्य महत्वपूर्ण काव्यमस्ति। शिशुपालवधे पदे-पदे वक्रता दरीदृश्यते। अत्र वक्रोक्तेः भेदप्रभेदानां विवेचनमस्ति। इत्थं निष्कर्षरूपेण कथयितुं समर्थोऽस्मि यत् महाकाव्यमिदं वक्रोक्तिदृशा सफ्लातामधिगच्छति।